# 68 - अष्टषष्टितम दशकम्
# गोपीकानां आह्लाद प्रकटनम्

तव विलोकनाद् (कृ) गोपिका जना: प्रमद सङ्कुला: (कृ) पङ्कजेक्षण ।
अमृत धारया (कृ) संप्लुता इव स्तिमिततां दधु: (कृ) त्वत्पुरो गता: ॥1॥

तदनु काचन (कृ) त्वत्कराम्बुजं सपदि गृह्णती (कृ) निर्विशङ्कितम् ।
घन पयोधरे (कृ) सन्निधाय सा पुलक संवृता (कृ) तस्थुषी चिरम्॥ ॥2॥

तव विभोऽपरा (कृ) कोमलं भुजं निज गलान्तरे (कृ) पर्यवेष्टयत् ।
गल समुद्गतं (कृ) प्राण मारुतं प्रति निरुन्ध-तीव (कृ) अति हर्षुला॥ ॥3॥

अपगत त्रपा (कृ) कापि कामिनी तव मुखाम्बुजात् (कृ) पूग चर्वितम् ।
प्रतिगृहय्य तत् (कृ) वक्त्र पङ्कजे निदधती गता (कृ) पूर्ण कामताम् ॥4॥

विकरुणो वने (कृ) संविहाय माम् अपगतोऽसि का (कृ) त्वामिह स्पृशेत् ।
इति सरोषया (कृ) ताव देकया सजल लोचनं (कृ) वीक्षितो भवान् ॥ ॥5॥

इति मुदाऽऽकुलै: (कृ) वल्लवी जनै: सम मुपागतो (कृ) यामुने तटे ।
मृदु कुचाम्बरै: (कृ) कल्पि तासने घुसृण भासुरे (कृ) पर्यशोभथा:॥ ॥6॥

कतिविधा कृपा (कृ) केऽपि सर्वतो धृत दयोदया: (कृ) केचि दाश्रिते ।
कतिचि दीदृशा (कृ) मा दृशेष्वपीति अभिहितो भवान् (कृ) वल्लवीजनै: ॥7॥

अयि कुमारिका (रा) नैव शङ्क्यतां कठिनता मयि (रा) प्रेम कातरे ।
मयि तु चेतसो (रा) वोऽनुवृत्तये कृत मिदं मयेति (रा)ऊचिवान् भवान् ॥8॥

अयि निशम्यतां (रा) जीव वल्लभा: प्रियतमो जनो (रा) नेदृशो मम ।
तदिह रम्यतां (रा) रम्य यामिनीषु अनुपरोध मिति (रा) आलपो विभो ॥9॥

इति गिराधिकं (कृ) मोद मेदुरैः व्रज वधू जनैः (कृ) साक मारमन् ।
कलित कौतुको (कृ) रासखेलने गुरुपुरीपते (कृ) पाहि मां गदात्॥ ॥10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥